तृतीयमनुष्टुबिति” च कात्या० सर्व्वानुक्र० “शुचिमनुष्णिहा प्राणमनुष्टुभेति” यजु० ।

**अनुष्ठ** त्रि० अनुक्रमेण तिष्ठति अनु+स्था—क षत्वम् । अनुक्रमेण स्थातरि “हिता विश्वा अनुष्ठा प्रवणेषु जिघ्नते इति ऋ० १,५४,१०, अनुष्ठाः अनुक्रमेण तिष्ठन्तीरिति भाष्यम् । भावे अङ् टाप् । अनुष्ठाने स्त्री ।

**अनुष्ठातृ** त्रि० अनु+स्था—तृच् स्त्रियां ङीप् । विधानकर्त्तरि “शास्त्रदेशितं फलमनुष्ठातरीति” न्यायवाक्यम् ।

**अनुष्ठान** न० अनु+स्था—भावे ल्युट् षत्वम् । विहितकर्म्मादिकरणे । अलब्धलाभादिकमभिधाय “एतच्चतुर्विधं विद्यात् पुरुषार्थप्रयोजनम् । अस्य नित्यमनुष्ठानं सम्यक् कुर्य्यादतन्द्रित”इति मनुराह स्म “उपरुध्यते तपोऽनुष्ठानम्”शकु० ।

**अनुष्ठित** त्रि० अनु+स्था—कर्म्मणि क्त । विधानेन कृते धर्म्मकार्य्यादौ “अस्माभिर्यदनुष्ठेयं गन्धर्व्वैस्तदनुष्ठितमिति” भा० व०प० ।

**अनुष्ठु** अव्य० अनु+स्था—कु । सम्यगित्यर्थे “पार्थिवानाम्नृतून् प्रासासद्धिदधावनुष्ठु इति ऋ० १,६५,२, अनुष्ठु इत्येतदव्ययं सम्यक्समानार्थं सुष्ठु यथेति भा० ।

**अनुष्ठेय** त्रि० अनु+स्था—कर्म्मणि यत् । विधेये । “अस्माभिर्यदनुष्ठेयं गन्धर्व्वैस्तदनुष्ठितमिति” भा०व०प० ।

**अनुष्ण** त्रि० न उष्णः न०त० । उष्णभिन्ने शीतपदार्थे “अनुष्णाभिरफेनाभिरद्भिस्तीर्थेन धर्मवित्दिति” मनुः । न उष्णः विरोधे न०त० । अलसे । अलसो हि शीतबाधाभावेऽपि शीतबाधामभिनयन् कर्त्तव्यकर्म्मणि जड़ इव भवति दक्षस्तु शीतेऽपि तदगणयित्वा कर्त्तव्यकरणाव अजड़ इव सन् व्याप्रियते इति तयोरुष्णानुष्णता । अत्र कारिण्यर्थे कनि अनुष्णकोऽपि । उत्पले न० । उष्णभिन्ने शीतले स्पर्शे पु० “अनुष्णाशीतपाकज” इति भाषा० । अनुष्णः स्पर्शश्च पृथिवीसमीरणयोः, तयोरौष्ण्योपलब्धिस्तु तेजःसंयोगविशेषादिति बोध्यम् ।

**अनुष्णगु** पु० अनुष्णाः शीतला गावः किरणाः अस्य । चन्द्रे अनुष्णकिरणादयोऽप्यत्र पु० ।

**अनुष्णवल्लिका** स्त्री अनुष्णा शीतला वल्लीव इवार्थे कनि टापि अत इत्त्वम् । नीलदूर्व्वायाम् ।

**अनुसंवत्सर** अव्य० संवत्सरे विभक्त्य० वीप्सायां वा अव्ययी० । वत्सरे इत्यर्थे, प्रतिवर्षे च । तत्र भवादौ ठञ्, अनुशतिका० उभयपदवृद्धिः । आनुसांवत्सरिकः प्रतिवर्षभवे त्रि० ।

**अनुसंवरण** न० अनु+सम्+वृ—ल्युट् । अनुक्रमेण गोपने । अनुसंवरणाय हितम् ठञ् अनुशतिका० द्विपदवृद्धिः । आनुसांवरणिकः तद्भवादौ त्रि० ।

**अनुसंहित** त्रि० अनु+सम्+धा—कर्म्मणि क्त । कृतानुसन्धाने यस्य ज्ञानार्थमन्वेषणादिकम् क्रियते तस्मिन् । संहितायां विभ० अव्ययी० । संहितायामित्यर्थे । ‘अथैके प्राहुरनुसंहितमिति ऋग्वेदप्रातिशाख्यम् ।

**अनुसन्तति** स्त्री अनुक्रमेण सन्ततिः । अविच्छेदधारायाम् “अनुसन्ततिपातिनः पटुत्वमिति” माघः ।

**अनुसन्धान** न० अनु+सम्+धाञ्—ल्युट् । अन्वेषणे, चिन्तने च

**अनुसन्धेय** त्रि० अनु+सम्+धा कर्म्मणि अर्हाद्यर्थे वा यत् । अनुसन्धातुं योग्ये, अनुसन्धातव्ये च ।

**अनुसर** त्रि० अनुसरति पश्चाद् गच्छति । अनु+सृ—ट स्त्रियां ङीप् । अनुचरे, सहगन्तरि च ।

**अनुसरण** न० अनु+सृ—ल्युट् । अनुगमने, सदृशीकरणे च ।

**अनुसवन** अव्य० सवनस्य पश्चात् अव्ययी० । सवनस्य (स्नानस्य) पश्चात् सवने, “अनुसवनमेनमालभेरन्निति का० २५,१२, २६, एनं ज्वराद्यभिभूतं दीक्षितं सर्व्वे ऋत्विजः सवनान्तेषु स्पृशेयुरिति तद्व्याख्या ।

**अनुसाय** अव्य० साये विभ० अव्ययी० । सायाह्ने इत्यर्थे तत्रभवः पारिमुखा० ञ्य । आनुसाय्यः तत्रभवे त्रि० ।

**अनुसार** पु० अनु+सृ-घञ् । अनुसरणे, “धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः” इति या० स्मृतिः । “कृतानुसारादधिका व्यतिरिक्ता न सिध्यतीति” मनुः ।

**अनुसारणा** स्त्री अनु+सृ+णिच्-युच् सारणा अनुगत्य सारणा चालना । अनुधावने, अपसारणायाम्, भीतिहेतोरनुधावने हि भीतस्य चालना भवतीति तस्य सरणहेतुत्वम् “तस्मात् पलायमानानां कुर्य्यान्नात्यनुसारणाम्” भा०शा०प० ।

**अनुसारिन्** त्रि० अनुसरति पश्चाद् गच्छति अनु+सृ—णिनि । अनुगन्तरि । “कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके । मृगानुसारिणं साक्षात् पश्यामीव पिनाकिन”मिति शकु० । “यदा यदा सतां हानिर्वेदमार्गानुसारिणामिति” पुरा० ।

**अनुसूया** स्त्री अनुसूयते अनु+सू—क्यप् । शकुन्तलासहचरीभेदे शकु० । अनुसूयेत्येके ।

**अनुसृति** स्त्री अनु+सृ—क्तिन् । अनुसरणे । अनुसरति कुलान्तरं कर्त्तरि संज्ञायां क्तिच् । कुलटायां स्त्रियां, स्त्री । तस्याः अपत्यं मतान्तरे कल्याण्यादि० ढक् इनङ् च । आनुसृतिनेयः तदपत्ये पु०स्त्री० ।

**अनुसृष्टि** स्त्री अनु+सृज—क्तिन् । अनुसर्जने । कर्त्तरि संज्ञायां